International Journal of Sanskrit Research 2023; 9(6): 177-179

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(6): 177-179
© 2023 IJSR
www.anantaajournal.com
Received: 07-11-2023
Accepted: 09-12-2023

**सुशील नेगी**
शोधच्छात्र, हिमाचल प्रदेश विश्व विद्यालय, शिमला, हिमाचल प्रदेश, भारत

**डा. सपना चंदेल**
शोधनिर्देशक, हिमाचल प्रदेश विश्व विद्यालय शिमला, हिमाचल प्रदेश, भारत

**Corresponding Author:**
**सुशील नेगी**
शोधच्छात्र, हिमाचल प्रदेश विश्व विद्यालय, शिमला, हिमाचल प्रदेश, भारत

# पूर्वमीमांसादर्शने स्फोटवादखण्डनम्
# (पार्थसारथिमिश्रकृतशास्त्रदीपिकायास्तर्कपादस्य विशेषाऽऽलोके)

**सुशील नेगी, डा. सपना चंदेल**

## प्रस्तावना

विश्वस्य प्राचीनतमा संस्कृतिर्भारतीयेति यस्यां वेदादीनि शास्त्राणि अपौरुषेयाणीति सर्वप्रथितं मतं सन्देहावसराभावः सर्वथा। किं नाम अपौरुषेयमिति विचारयामश्चेद् यस्य रचना केनचिन्मानवविशेषेण न कृता स्यात्, यच्च नित्यं स्यात्, न जीवो नैवेश्वरो रचयिता भवेत् तदेव अपौरुषेयमिति कथ्यते। यतो हि पुरुषविशेषकृतकृत्ये कस्मिंश्चिदपि संशयविपर्ययादीनामवसरा भवन्ति परञ्च वेदादिशास्त्रेषु न तथाभावः कश्चिदपि दरीदृश्यतेऽनादिकालात्। तस्मादेतत् सिद्धान्तितं यद् वेदादिशास्त्राण्यपौरुषेयाणीति। "आपौरुषेयं वाक्यं वेदः" उद्घोषणेयमस्यां विशालतमसंस्कृतावेव प्राप्यते विश्वस्य अन्यसंस्कृतिषु नेत्थमुद्घोषणा। अत एव ऋषिणा याज्ञवल्क्येन स्पष्टमुद्घोषितम्-

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**
**एवं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥**

वेदादय एव प्राचीनतमायाः संस्कृतेरुद्वाहकरूपेण परिगणिताः सन्ति, वेदादिभिरेवास्याः विशालतमायाःसंस्कृतेः स्पष्टज्ञानं भवतीति। समस्तवेदाः कालान्तरे शब्दब्रह्मसंज्ञां प्राप्नुवन्ति येन वेदादीनां दार्शनिकमहत्ता वर्धते। आचार्यभर्तृहरिः शब्दब्रह्मणो व्याख्यानं विदधाना परमतत्त्वनिरूपणं विदधाति-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**[1]

परम्परायामस्यां शब्दस्य अक्षरस्य वर्णस्य वा विषये मनीषिभिर्गभीरचिन्तनानि विहितानि येन वर्तमानकालेऽस्माकं समक्षे शब्दमधिकृत्य विशालसाहित्यमेकं प्राप्यते। संस्कृतेरस्याः प्रमुखोद्देयं भौतिकवस्तुनिः सारतां प्रदर्श्य मानवसमाजायाऽऽध्यात्मिकपथनिर्माणमस्ति।

---
[1] वाक्यपदीयम्, ब्रह्मकाण्डम् १.१ पृ० १२

अस्माद्धेतुरस्यां संस्कृतौ प्रत्यक्षाऽप्रत्यक्षर्षिभिरनेकानेकग्रन्थाः प्रणीता येषु जीवनमूल्यानां निर्देशाः सन्ति दार्शनिकसिद्धान्तानां गभीरविषया उपस्थापितास्तेषु शब्दविषयोऽन्यतमः। भगवता श्रीकृष्णेनापि अक्षराणामकारोऽस्मि[2] इति वचनद्वारा शब्दस्य अक्षरस्य वा दार्शनिकमहत्त्वमुपस्थापितम्।

प्रायः त्रयोदशशताब्द्यां माधवाचार्येण सर्वदर्शनसंग्रह इति ग्रन्थः प्रणीतः, यस्मिन् आचार्वाकदर्शनमद्वैतदर्शनमस्ति। दर्शनेषु तेषु पाणिनिदर्शनजैमिनिदर्शनयोरपि सिद्धान्ताः सन्ति।परम्परायां व्याकरणदर्शनं शब्दानुशासनमिति तथा च जैमिनि (पूर्वमीमांसा) दर्शनं वाक्यशास्त्रमिति नामभ्यां ज्ञायेते। अथ शब्दानुशासनमिति सूत्रेण व्याकरणदर्शनारम्भो भवति येन शब्दानुशासनद्वारा वेदादीनां रक्षाकरणमस्य शास्त्रस्य परमप्रयोजनं भवति तस्माद् व्याकरणशास्त्रस्य शब्दानुशासनं भवति साक्षात्प्रयोजनम्। पारम्पर्येण तु वेदरक्षादीनि। अत एवोक्तं भगवता भाष्यकारेण रक्षोहागमलघ्वसन्देहाः प्रयोजनम्। [3] तथा च अथातो धर्मजिज्ञासा इति सूत्रेण मीमांसादर्शनस्य प्रारम्भो भवति येन वैदिकधर्मस्य समुचितीकरणमेव अस्य शास्त्रस्य परमप्रयोजनमुद्घोषितमिति भगवता कुमारिलभट्टेन-

**प्रायेण लोके मीमांसा लोकायतीकृताः।**
**तामास्तिकपथे कर्तुमयं यत्नः कृतः मया॥**[4]

प्रकृतिप्रत्ययसिद्धान्तैर्व्याकरणदर्शनं जगत एकत्वस्थापनां करोति तथा च वैदिकवाक्यादीनां विश्लेषेण मीमांसादर्शनं वैदिकधर्मव्याख्यां विदधाति। मीमांसादर्शने वैदिकया-गादीनां विधिवाक्यादीनामपि विश्लेषणानि विधीयन्ते।

परम्परायामस्यां व्याकरणदर्शनस्य सर्वप्रथितं सिद्धान्तमस्ति स्फोटवादः, येन माध्यमेन ब्रह्मतत्त्वस्थापना वैयाकरणैः कृता। व्याकरणदर्शनस्य इममेव स्फोटवादमधिकृत्य पूर्वमीमांसकैः साकं वादाः प्राप्यन्ते, यत्र वैयाकरणाः पूर्वपक्षीभूताः मीमांसकाश्चोत्तरपक्षीभूताः।

व्याकरणसिद्धान्ते शब्दाः नित्यास्तेन स्फोटोऽपि नित्यः। सिद्धे शब्दार्थसम्बन्धे[5] शब्दार्थयोः सम्बन्धोऽपि नित्यः नात्र संशयावसरः। स्फोटमिममेव स्वीकृत्य वैयाकरणाः वर्ण-पद-वाक्यस्फोटानां सिद्धान्तान् प्रस्तुवन्ति। किं नाम स्फोटः इति विचारयमश्चेत् नित्येषु शब्देषु प्रत्येकाः वर्णाः कूटस्थाः, अचलाः, वृद्धि-क्षयादि-विकाररहिताः भवन्ति त एव स्फोटा इति कथ्यन्ते। नित्याश्च शब्दाः नित्येषु च शब्देषु कूटस्थैर विचालिभि वर्णैर्भवितव्यमनपायो- पजनविकारिभिः।[6]

किं नाम शब्दः इति चर्चां कुर्मः तत्र सिद्धान्तितमस्ति लोके पदार्थप्रतीतकारी ध्वनिः शब्दः भवति। प्रतीतपदार्थको लोके ध्वनिः शब्द उच्यते। तद्यथा शब्दं कुरु शब्दं मा कार्षीः शब्दकार्य्यं माणवकः। तस्माद् ध्वनिः शब्दः। [7]इमे लौकिकाः ध्वनयस्तु वृद्ध्यादिगुणैर्युक्ताः भवन्ति, एभिर्ध्वनिभिर्बुद्धौ संस्कार उत्पद्यते, अनेनैव संस्कारेण शब्दाभिव्यक्तिर्भवति।

अत्र बुद्धिस्था ये शब्दाः, ते तु यथास्थिताः भवन्ति, विकाराः परिवर्तनानि वा ध्वनिष्वेव भवन्ति। असावेव अपरिवर्तनशीलाः शब्दाः एव स्फोटा इति वैयाकरणानां मतम्।अनेनैव स्फोटेन अर्थाः आविर्भवन्ति। व्याकरणस्य अयमेव स्फोटवादः समासेन अस्ति।

मीमांसायां कुमारिलभट्ट्पादानां शिष्यः पार्थसारथिमिश्रः स्फोटवादस्य स्वरूमिमम् अङ्गीकारं न करोति। मीमांसकानां सिद्धान्तो वर्तते यत् प्रत्येकवर्णा अर्थप्रत्यायका भवन्ति अर्थात् पूर्व-पूर्ववर्णाः सहभावेन स्वम् अर्थं प्रकाशयन्ति, असावेव सिद्धान्तो मीमांसादर्शने वर्णप्रत्यायकः इति नाम्ना ज्ञायते।

वैयाकरणैः प्रश्न उपस्थाप्यते यत् दर्श-पौर्णमासादियागेषु आग्नेयादियागानाम् अनुष्ठानस्य क्रमस्तु भवत्येव येन तद्यागजन्याऽपूर्वमाध्यमेन आग्नेयादियागानां फलमपि प्राप्यते परञ्च वर्णानां सहभावः कथं क्रियते अर्थात् गौः (ग्+औ+:) एतेषां वर्णानां सहभावः कथं भवेत् इति पृच्छा वर्तते। ननु क्रमवर्तिनामप्युत्पत्त्यपूर्ववशेन युक्तं साहित्यं वर्णानां तु कथम्?[8]

मीमांसका उत्तरयन्ति यत् प्रत्येकैः वर्णैः(एकैकैः ) वर्णैः अर्थाभिधानं न भवति उत्तरोत्तरवर्णोच्चारे पूर्व-पूर्वोत्तरवर्णनाशनात्। अत एव अत्र पूर्व-पूर्वोत्तर वर्णानां संस्कास्य कल्पना क्रियते, अनेनैव संस्कारेण प्रत्येकवर्णानां सहभावः स्वीक्रियते, संस्कारानेनैव वर्णेषु क्रमः (Order) अपि अङ्गीक्रियते। वर्णानामप्येकैकशोऽभिधानदर्शनात् सकलोच्चारणे चाऽवगमात् संहत्यकारित्वे निश्चिते

[2] श्रीमद्भगवद्गीता, अध्याय
[3] सर्वदर्शनसङ्ग्रहः, पृ० ११
[4] श्लोकवार्तिकम्,
[5] महाभाष्यम्, पस्पशाह्निकम्,
[6] महाभाष्यम्, द्वितीयम् आह्निकम्, पृ० ८९
[7] महाभाष्यम्, पस्पशाह्निकम्, पृ० १९
[8] शास्त्रदीपिका, तर्कपादः, पृ० ४३२

स्वरूपेणासम्भवात् संस्कारकल्पनं युक्तमेव चैककर्तृत्वं क्रमविशेषश्चाद्रियते।[9]

कुमारिलभट्टपादाः अपि वर्णानां साहित्यविषये स्वमतमुपस्थापयति कारिकयाऽनया-

**तेषाम् गुणभूतानामर्थप्रत्यायनं प्रति।**
**साहित्यमेककर्त्रादिक्रमश्चापि विवक्षितः॥**[10]

पुनरपि वैयाकरणानामत्र पृच्छा वर्तते यत् वर्णास्त्वनेकाः, तेन अनेकवर्णसंस्कारकल्पनं गौरवदोषाऽऽह्वाहनमेव। नन्वेवं प्रतिवर्णं संस्कारकल्पनात् अनेककल्पना स्यात् तद्वरमेकमेव शब्दतत्त्वं कल्पितम्।[11] अत एव गौरवदोषनिवाराय एकस्य शब्दतत्त्वस्य कल्पना वरम् इति ।

मीमांसका उत्तरयन्ति यत् सर्वप्रथमं श्रावणप्रत्यक्षेणैव शब्दः गृह्यते अर्थात् श्रोत्रेन्द्रियेण शब्दाः गृह्यन्ते, वर्णातिरिक्तस्य ग्रहणं श्रोत्रेन्द्रियेण न भवति तेन सिद्ध्यति यत् स्फोटः इति नाम्ना कश्चनापि पदार्थः न अर्थात् स्फोटसत्ता न भवति। तेन कथं एकतत्त्वभूतस्फोटकल्पना कर्तव्येति। शब्दो हि प्रत्यक्षग्राह्योऽभ्युपगम्यते न च प्रत्यक्षेण वर्णातिरिक्तं किञ्चित् प्रकाशते, तेन नास्तीत्यवगच्छामि।[12]

मीमांसकानां मन्तव्यं द्वितीयमस्ति यत् स्फोटस्वीकारे गौरवदोष एव प्रथमं स्फोटस्वीकरणं ततः शब्दब्रह्मस्वीकरणं च गौरवायैव। त्वयाऽपि हि शब्दतत्त्वं कल्पयित्वा पुनः संस्कारकल्पनाऽवश्यं कर्तव्या।[13]

मीमांसकानां तृतीयस्तर्को वर्तते यत् स्फोटस्त्वेकमेव तत्त्वं वर्णाश्चानेकाः। अस्यां स्थितौ एकत्वानेकत्वधर्मयोरारोपणं विरुद्धधर्मयोः कथं कर्तुं शक्यम् अत एव स्फोटसिद्धान्तस्तर्क-हीन इति ।

वर्णानां साहित्यभावे वैयाकरणानां सिद्धान्तो वर्तते यत् नादाः (ध्वनयः) एव अर्थप्रत्यायकाः इति मन्तव्यं स्यात्। अनेन नादानां (ध्वनीनाम्) साहित्यभावस्य न आवश्यकता नैव संस्कारकल्पना। प्रत्येकमेव नादाः शब्दमभिव्यञ्जन्ति।[14]

मीमांसकानामुत्तरमस्ति कल्पनेयं नैवोचिता। यतो हि वर्णोच्चारणसमये पूर्व-पूर्वनादाः अर्थम् न स्पष्टतया अभिव्यञ्जन्ति परञ्च उत्तरोत्तरनादाः स्पष्ट-स्पष्टतरान् अर्थान् अभिव्यञ्जन्ति। सिद्धान्तमिमं स्पष्टीकर्तुं मीमांसका दृष्टान्तमेकं प्रस्तुवन्ति यत् प्रथमतया दूरप्रदेशात् आम्रवृक्षः गज इव प्रतिभाति किञ्चित् निकटदेशात् तृणसमूह इव परञ्च अधिकनिकषात् आम्र इति वृक्ष एव दृश्यते। अत एव वैयाकरणानां सिद्धान्तोऽसमुचितः एव। न चैवमुत्तरनादवैयर्थ्यम्, पूर्वे हि नादाः शब्दमस्फुटमभिव्यञ्जन्ति उत्तरोत्तरे स्फुटं स्फुटतरं च व्यञ्जन्ति नोत्तरेषामानर्थक्यम्।[15]

मीमांसकाः पुनस्तर्कमुपस्थापयन्ति ये वर्णाः श्रोत्रेण श्रूयन्ते तेन संस्काराः उत्पद्यन्ते त एव संस्काराः अर्थात् संस्कारसमूहः सर्वान् वर्णान् स्वविषयरूपिणीं स्मृतिम् उत्पादयन्ति तस्यामेव स्मृतौ एकस्मिन् काले सर्वेषां वर्णानां युगपदेव सक्रमरुपेण अवभासः भवति येन अर्थप्रत्यायनं भवति। विषयोऽयं भर्तृहरिणा प्रकटीकृतः-

**नादैराहितबीजायामत्यन्तेन ध्वनिना सह।**
**आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते॥**[16]

मीमांसकानां पुनरपि तर्कोऽस्ति यद् ध्वनयस्तु क्षणस्थायिनः एव। उत्तरोत्तरवर्णोच्चारणे पूर्व-पूर्वोत्तरवर्णानां नाशः भवति, अतः तृतीयक्षणे ये ध्वनयः कथं स्फोटाभिव्यञ्जकाः भवन्ति? अत एव स्फोटाभिव्यञ्जनं ध्वनीभिः कथं भवेत्।

तेन मीमांसादर्शने वर्णानां संस्कारस्य कल्पना क्रियते येन संस्कारेण स्मृतिः उत्पद्यते तया एव स्मृत्या वर्णानां सहभावः साहित्यं वा भवति येन अन्ततोगत्वा प्रत्येकवर्णाः अर्थस्य वाचकाः भवन्ति।

अत एव मीमांसादर्शने पूर्वपूर्ववर्णजनितसंस्कारस-हितोऽन्त्यवर्णः प्रत्यायकः भवति अयं सिद्धान्तः मान्यः।

## सन्दर्भ


1. वाक्यपदीयम्, ब्रह्मकाण्डम्
2. शास्त्रदीपिका, तर्कपादः
3. महाभाष्यम्, पस्पशाह्निकम्
4. श्लोकवार्तिकम्
5. अर्थसङ्ग्रहः (लौगाक्षिभास्करकृतः)
6. सर्वदर्शनसङ्ग्रहः
7. संस्कृति के चार अध्याय - रामधारी दिनकर कृत
8. व्याकरण तन्त्र पर काव्यशास्त्र का प्रभाव - प्रो० हरि राम मिश्रा कृत


[9] तत्रैव, पृ० ४३२
[10] श्लोकवार्तिकम्, स्फोटवादः, ७०
[11] शास्त्रदीपिका, तर्कपादः, पृ० ४३४
[12] शास्त्रदीपिका, तर्कपादः, पृ० ४३४
[13] तत्रैव, पृ० ४३५
[14] तत्रैव, पृ० ४३५
[15] शास्त्रदीपिका, तर्कपादः पृ० ४३५
[16] वाक्यपदीयम्, ब्रह्मकाण्डम्, १.९५